# संस्कृतम्

## (209)

## शिक्षक-अंकितमूल्यांकनपत्रम् - I

## (पाठाः प्रथमतः दशमपर्यन्तम्)

पूर्णांकाः 25

**निर्देशाः**

(i) सर्वेप्रश्नाः अनिवार्याः। सर्वेषां प्रश्नानाम् अंकाः समानाः।

(ii) उत्तरपुस्तिकायां प्रथमपृष्ठे स्वनाम, अनुक्रमांकसंख्या, शिक्षणकेन्द्रस्य नाम, विषयस्य नाम इति सर्वं लेखनीयम्।

1. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं पचाशत् शब्देषु (50) लिखत –

(क) 'प्रेरणा' पाठात् लट्लकारस्य पच क्रियापदानि चित्वा तत्स्थाने उत्तमपुरुषस्य एकवचने क्रियापदानि विलिख्य तेषां स्ववाक्येषु प्रयोगं कुरुत।

(ख) 'सदाचार' पाठे भवते कानि पचजीवनमूल्यानि सर्वाधिकानि रोचन्ते, तानि आधत्य पचवाक्यानि लिखत। यथा विद्वांसः अप्राप्यं वस्तु नैव वाछन्ति।

(ग) भवान् वानरः सन् सहसा आपतितायां विपत्तौ, आत्मानं कथम् उद्धरिष्यति इति पचवाक्येषु लिखत।

2. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं पचाशत्शब्देषु (50) लिखत–

(क) सज्जन, क्षमा, क्रोध, दानम्, मित्रम्–एतदाधारितानि पचसूक्तिवाक्यानि अन्यस्माद् ग्रन्थात् ससन्दर्भं लेखनीयानि।

(ख) आर्यभटेन प्रतिपादितान् कानपि पचगणितसिद्धान्तान् विलिख्य तेषाम् आधुनिकविज्ञानेन सह तुलनां कुरुत।

(ग) 'मातुराज्ञा गरीयसी' पाठम् आधत्य हिडिम्बायाः चारित्रिकं वैशिष्ट्यं पचवाक्येषु लिखत।

3. कमप्येकं प्रश्नं दशवाक्येषु उत्तरत–

(क) सिंह–बक श्वान गर्दभ–पथिवीभ्यः अस्माकं कृते ग्राह्याः काश्चन दशशिक्षाः लिखत।

(ख) केषाचन पच पशूनां चित्राणि संगह्य/निर्माय तेषां शुद्धपर्यावरणे योगदानं प्रतिचित्रं वाक्यद्वयेन लिखत।

4. कमपि एकं प्रश्नं दशवाक्येषु उत्तरत–

(क) मनसः चचलकारणात् जीवने यदा कदा विचित्रा स्थितिः संजायते। भवान् स्वजीवनानुभवात् कामपि ईदर्शीं घटनां वर्णयत।

(ख) स्वजीवने अक्रोधस्य महत्त्वं वर्णयत।

5. **परियोजनाकार्यम्**

भवतां नगरे आयोजिते संस्कृतदिवससमारोहे उपस्थितानां केषाचन पचसंस्कतविदुषां/कवीनां वा नामानि विलिख्य तेषां रचनानां वैशिष्ट्यम् अपि लिखत।

**अथवा**

प्राचीन संस्कतसाहित्यग्रन्थेभ्यः काश्चन दशसूक्तीः चित्वा विषयनिर्देशपूर्वकं लिखत।

# संस्कृतम्

## (209)

### शिक्षक-अंकितमूल्यांकनपत्रम् - II

### (पाठाः- एकादशतः विंशतिपर्यन्तम्)

पूर्णांकाः 25

**निर्देशाः**

(i) सर्वेप्रश्नाः अनिवार्याः। सर्वेषां प्रश्नानाम् अंकाः समानाः।

(ii) उत्तरपुस्तिकायां प्रथमपृष्ठे स्वनाम, अनुक्रमांकसंख्या, शिक्षणकेन्द्रस्य नाम, विषयस्य नाम इति सर्वं लेखनीयम्।

1. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं पचाशत् शब्देषु (50) लिखत–

(क) अनागतविधाता मत्स्यसंक्षयं विचार्य सरसः बहिर्गमनाय च किं तर्कम् उपस्थापयति? भवतां मते तत्स्थितौ किं करणीयं स्यात्? लिखत।

(ख) 'अयोध्यां कुरु वैदेहि! प्रणामं पुनरागता' इति पाठे येषां पर्वतभ्रमणानां वर्णनम् अस्ति, तेषाम् आधुनिक काले स्थान–क्षेत्र–प्रदेशदष्ट्या परिचयं वर्णयत।

(ग) भास्कराचार्यस्य ज्योतिर्गणितक्षेत्रे किं योगदानम् अद्यापि आधुनिकवैज्ञानिकानां कृते महत्त्वपूर्णं वर्तते इति स्वबुद्ध्या वर्णयत।

2. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं पचाशत् शब्देषु (50) लेखनीयम् –

(क) अनुक्तमपि ऊहति पण्डितो जनः इति नाट्यांशे आत्मानं भोजं मत्वा स्वव्यवहारकौशलं वर्णयत।

(ख) प्रहेलिकापाठम् आधत्य दश श्लिष्टपदानि चित्वा तेषाम् परस्परविरुद्धम् अर्थद्वयं लिखत। केषाचन पचानां श्लिष्टपदानां च अर्थभेदं स्पष्टयन्तः वाक्येषु प्रयोगं कुरुत।

(ग) विक्रम संवत् 2068/2011 इसवीये वर्षे कमपि द्वयम् शुभावसरम् उपलक्ष्य द्वे वर्धापनपत्रे रचयत।

3. कस्यचिदेकस्य प्रश्नस्य उत्तरं दशवाक्येषु लिखत–

(क) 'करुणापरा हि साधवः' पाठम् आधत्य शक्रस्य चारित्रिकं वैशिष्ट्यम् लिखत। शक्रस्य यत् विशिष्टं चरित्रं भवते रोचते तद्विषये वाक्यद्वयं लिखत।

(ख) 'अनागतं यः कुरुते स शोभते' इति पाठम् आधत्य सिंह–श्गालयोः मध्ये वार्तां नाट्यरूपेण प्रस्तूयताम्।

4. 'शरीरमाद्यं खलु धर्मसाधनम्' पाठम् आधत्य आदर्शदिनचर्याम् स्वास्थ्यवर्धनाय भवान् किम् किम् आवश्यकं मन्यते इति साररूपेण दशवाक्येषु लिखत।

**अथवा**

'गीतामतम्' पाठम् आधत्य 'वाङ्मयं तपः' इत्यस्य अद्यतने कालेपि उपयोगितां समर्थयन् सोदाहरणम् दशवाक्यानि लिखत।

5. **परियोजनाकार्यम्**

अद्यत्वे प्रायः नगरेषु उपनगरेषु सर्वत्र योगकक्षाः प्रचलन्ति। योगे प्राणायामस्य योगासनानां च विशिष्टं महत्त्वम् अस्ति। भवान् कस्यापि योगकक्षायाः विस्ततं विवरणं सचित्रं प्रदर्शयत।

**अथवा**

केषाचन दश पक्षिणां चित्रं संगह्य तेषां नामानि, वैशिष्ट्यानि, पर्यावरणे च तेषाम् उपयोगित्वं अस्माकं जीवनेन सह समबन्धं च वर्णयत।

# संस्कतम्

## (209)

## शिक्षक-अंकितमूल्यांकनपत्रम् - III

## (पाठाः एकविंशतितः द्वात्रिंशत् पर्यन्तम्)

पूर्णांकाः 25

**निर्देशाः**

(i) सर्वेप्रश्नाः अनिवार्याः। सर्वेषां प्रश्नानाम् अंकाः समानाः।

(ii) उत्तरपुस्तिकायां प्रथमपृष्ठे स्वनाम, अनुक्रमांकसंख्या, शिक्षणकेन्द्रस्य नाम, विषयस्य नाम इति सर्वं लेखनीयम्।

1. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं पचाशतशब्देषु (50) लिखत–

(क) आदिशंकराचार्येण अनेके ग्रन्थाः रचिताः। तेषु ग्रन्थेषु कयोश्चित् द्वयोः संक्षिप्तपरिचयं लिखत।

(ख) 'तेजसाम् हि न वयः समीक्ष्यते' इति पाठम् अधिकत्य चन्द्रकेतोः चरित्र–चित्रणं कुरुत।

(ग) 'स्वस्तिपंथामनुचरेम' इति पाठस्य शिक्षा वर्तमानकालेपि समीचीना अस्ति। पक्षे पचतर्कान् लिखत।

2. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं पचाशतशब्देषु (50) लिखत –

(क) 'कथालेखनम्' इति पाठे प्रदत्तां' सत्संगत्याः प्रभावः' कथाम् आधारीकत्य स्वानुभवेन एकां कथां लिखत।

(ख) 'दर्पः मूलमनर्थानाम्' पाठमधिकृत्य दर्पनाशस्य उपायान् लिखत।

(ग) वयं पथिव्याः पुत्राः स्मः। अतः पथिव्याः रक्षणं कथं भवेत् इति चिन्तयित्वा तस्याः रक्षणार्थं पच सार्थकान् उपायान् लिखत।

3. कमपि एकं प्रश्नं दशवाक्येषु उत्तरत–

युवावस्थायाम् शक्तिसम्पन्नाः भूत्वा जनाः प्रायः विवेकशून्याः भवन्ति। अजलं स्नानम् पाठम् आधारीकृत्य गुरुपदेशः कथं विवेकम् जनयति? दशवाक्येषु लिखत।

**अथवा**

'मान्येषु मान्यवरः लोकमान्यः तिलकः' पाठम् आधारीकृत्य देशभक्ततिलकस्य चारित्रिक–वैशिष्ट्यम् दशवाक्येषु लिखत।

4. राजात्रिविक्रमसेनस्य चरित्र–चित्रणं 'साहसे श्रीः प्रतिवसति' इति पाठम् आधारीकृत्य दशवाक्येषु लिखत।

**अथवा**

'विरहकातरं तपोवनम्' नाट्यांशे प्रयुक्तानां पात्राणं जीवनं तपोमयम् आसीत् इति पक्षे पचतर्कान् लिखत।

**अथवा**

भारतम् अस्माकं जन्मभूमिः अस्ति। सा मातुः इव अस्मान् पालयति। तस्याः सम्मानार्थं 'मे प्रियो भारतभव्यदेशः' इति पाठे यत् लिखितं तत् दशवाक्येषु लिखत।

5. **परियोजनाकार्यम्**

भारतसर्वकारस्य विभिन्नेषु विभागेषु प्रयुक्तानि दशध्येयवाक्यानि सचिह्नं लिखत।

**अथवा**

एकविंशतिः पाठतः द्वात्रिंशत् पाठपर्यन्तम् 'क्त' प्रत्यययुक्तपदानां चयनं कत्वा तान् अर्थसहितम् लिखत।